# संस्कृत-वार्ता:

दिनाङ्कः-21.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् यदा सर्वमपि विश्वं बहुविधसङ्कटान् सम्मुखीकरोति तदा भारतम् स्थिरतायाः सम्वेदनशीलतायाः च प्रतीकत्वेन उद्भूतम् ।
- राष्ट्रेण अद्य आरक्षक-स्मारक-दिवसः आचर्यते, रक्षामन्त्री राजनाथसिंहः अवदत् यत् यानि क्षेत्राणि पूर्वं रेड्-कारिडार् इति नाम्ना प्रसिद्धानि आसन्, तानि अधुना विकास-कारिडार् इत्यनेन रूपेण परिवर्तितानि सन्ति ।
- निर्वाचनायोगेन बिहार-विधानसभायाः निर्वाचनावधौ , मतदानपूर्वं , मतदानदिवसे च प्रकाश्यमानानि विज्ञापनानि अधिकृत्य पूर्व-प्रमाणनं प्राप्तुं सर्वाणि अपि राजनीतिदलानि निर्दिष्टानि ।
- ताकायिचि साने इत्येषा जपानस्य प्रथमा महिला प्रधानमन्त्रित्वेन निर्वाचिता प्रधानमन्त्री श्रीमोदी अवदत् यत् सः भारत-जपान-विशिष्ट-सामरिक-वैश्विक-सहभागित्वम् इतोऽपि सुदृढं कर्तुं तया सह कार्यं कर्तुं उत्सुकः अस्ति ।

---

प्रधानमन्त्री-पत्रम्

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् यदा सर्वमपि विश्वं बहुविधसङ्कटान् सम्मुखीकरोति तदा भारतम् स्थिरतायाः सम्वेदनशीलतायाः च प्रतीकत्वेन उद्भूतम् । दीपावल्याः अवसरे देशस्य नागरिकान् प्रति लिखिते पत्रे श्रीमोदि-वर्यः अवदत् यत्, भारतं निकट-भविष्ये विश्वस्य तृतीया बृहत्तमा अर्थव्यवस्था भवितुं प्रवृत्तम् अस्ति । सः अवदत् यत्, विकसितस्य आत्मानिर्भरस्य च भारतस्य अस्यां यात्रायां राष्ट्राय स्वकीयं कर्तव्यं निर्वोढुं प्रत्येकं नागरिकस्य प्राथमिकं दायित्वम् अस्ति । प्रधानमन्त्री पुनः अवदत् यत्, आपरेशन-सिन्दूर् इत्यभियानस्य समये भारतं राष्ट्रधर्मं

समर्थयत् अन्यायस्य प्रतीकारम् अकरोत् । सः अवदत् यत्, भगवान् श्रीरामः जनान् धर्मं धारयितुं शिक्षयति सहैव अन्यायं विरुध्य युद्धं कर्तुं साहसम् अपि प्रददाति ।

-----------------------------------------------

<u>नव-आरक्षक-सेना-दिवसः</u>

अद्य राष्ट्रेण आरक्षक-स्मारक-दिवसः आचर्यते। अस्मिन् दिने नवपञ्चाशदुत्तर-नवदश-शत-तमाब्दे लदाखस्य **<u>हाट्-स्प्रिङ्ग्स्</u>** इत्यस्मिन् क्षेत्रे चीन-सैनिकैः कृते भीषणे शस्त्राक्रमणे दशसंख्याकाः वीराः आरक्षकाः निज-प्राणाहुतिं प्रायच्छन् । ततः परं प्रतिवर्षं अक्टूबर-मासस्य एकविंशति-दिनाङ्कः आरक्षक-स्मरणदिवस-रूपेण आचर्यते । रक्षामंत्री राजनाथसिंहः अवदत् यत् राष्ट्रस्य बाह्यस्य आन्तरिकस्य च सुरक्षायाः सन्तुलनम् अधुना पूर्वकालात् अधिकम् महत्त्वपूर्णम् अस्ति, यतः राष्ट्रम् सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसित-भारतस्य लक्ष्यं प्रति अग्रे गमिष्यति । नवदिल्ल्याम् आरक्षक-स्मारक-दिवसस्य कार्यक्रमे सम्बोधयन्, श्रीसिंह-वर्यः अवदत् यत्, सेनाः आरक्षकाः च विभिन्नेषु मञ्चेषु कार्यं कुर्वन्ति, परञ्च राष्ट्ररक्षायै तेषां ध्येयः समानः एव अस्ति । सः सशस्त्र-सेनाः, आरक्षक-सेनाः च राष्ट्रियसुरक्षायाः आधारस्तम्भरूपेण अवर्णयत् । अग्रिमवर्षस्य मार्च-मासपर्यन्तं उग्रवादस्य समस्या समाप्ता भविष्यति इति अपि सिंह-वर्यः सुदृढविश्वासेन सह प्रोक्तवान् । सः अवदत् यत् अस्मिन् वर्षे अनेके प्रमुख-नक्सल-मतानुयायिनः उन्मूलिताः, सहैव वामपक्ष-उग्रवादेन प्रभावितानां मण्डलानां सङ्ख्या च न्यूना सञ्जाता । श्रीसिंह-वर्यः अवदत् यत् यानि क्षेत्राणि पूर्वं **<u>रेड्-कारिडार्</u>** इति नाम्ना प्रसिद्धानि आसन्, तानि अधुना **<u>विकास-कारिडार्</u>** इत्यनेन रूपेण परिवर्तितानि सन्ति ।

अस्मिन् अवसरे इण्टेलिजेन्स्-ब्यूरो इत्यस्य निदेशकः **<u>तपन्-डेका</u>** इत्येषः अवदत् यत् गतवर्षे एकनवत्युत्तरैकशतम् आरक्षक-कर्मचारिणः स्वकर्तव्यं निर्वोढुं स्वप्राणाहुतिं प्रायच्छन् । सः अवदत् यत् स्वातन्त्र्यात् आरभ्य आहत्य चतुरशीत्यधिक-षड्-शताधिक-षड्त्रिंशत्-सहस्रसंख्याकाः आरक्षक-कर्मचारिणः स्वकर्तव्य-निर्वहने सर्वोच्चत्यागम् अकुर्वन् । उपराष्ट्रपतिः सी. पी. राधाकृष्णन्-वर्यः अस्मिन् अवसरे आरक्षक-कर्मचारिणाम् अनुकरणीय-साहसस्य सर्वोच्च-त्यागस्य च सम्मानं कुर्वन् तेभ्यः श्रद्धाञ्जलिम् अयच्छत् । अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी

आरक्षक-कर्मचारिणां साहसस्य प्रंशसां कुर्वन् कर्तव्यनिर्वहने तेषां सर्वोच्चबलिदानस्य अनुस्मरणम् अकरोत् । गृहमन्त्री अमितशाहः अवदत् यत्, अपराधान्, आन्तरिकसुरक्षायै समुत्पन्नां विभीषिकां च विफलीकृत्य, अनुकरणीयसाहसेन प्रतिबद्धतया च सह नागरिकाधिकाराणां संरक्षणं कृत्वा, सुरक्षासैनिकाः स्वकीयां वैभवगाथां लिखितवन्तः ।

----------------------------------------------

<u>निर्वाचनायोग: - बिहारनिर्वाचनम्</u>

बिहार-विधानसभा-निर्वाचनस्य द्वितीयचरणस्य अन्तिमचरणस्य च नामाङ्कनपत्राणां परीक्षणम् अद्य आरब्धम्। अभ्यर्थिनः गुरुवासरपर्यन्तं नामाङ्कनं प्रत्यावर्तयितुं शक्नुवन्ति । विंशति-जनपदेषु द्वाविंशति - उत्तर - एकशतम् निर्वाचनक्षेत्रेभ्यः षड्विंशति- शतात् अधिकानि नामाङ्कनपत्राणि पञ्जीकारितानि । द्वितीय-चरणस्य मतदानं नवम्बर्-मासस्य एकादश - दिनाङ्के भविष्यति। प्रथमचरणस्य मतदानं नवम्बर-मासस्य षड्-दिनाङ्के भविष्यति। अस्मिन् विधानसभा-निर्वाचने राजनैतिकदलैः आसनानां संख्यायाः वर्धापनाय प्रयत्ने अभिनेतृभ्यः, लोकगायकेभ्यः, सङ्गीतकारेभ्यः, उच्चाधिकारिभ्यः च अधिकानि अवसराणि दत्तानि। निर्वाचनायोगेन बिहार-विधानसभायाः निर्वाचनावधौ , मतदानपूर्वं , मतदानदिवसे च प्रकाश्यमानानि विज्ञापनानि अधिकृत्य पूर्व-प्रमाणनं प्राप्तुं सर्वाणि अपि राजनीतिदलानि निर्दिष्टानि ।

----------------------------------------------

<u>प्रधानमन्त्री-जपान्-प्रधीनमन्त्री</u>

ताकायिचि साने (Takaichi Sanae) इत्येषा ऐतिहासिकरूपेण जपानस्य संसत्सदस्यैः प्रथमा महिला प्रधानमन्त्रित्वेन निर्वाचिता । लिबरल्-डेमोक्रैटिक्-दलस्य नेत्री ताकायिचि, दीर्घकालिक-सहयोगिनः **कोमिएटो** इत्यस्मात् दलात् <u>एल्. डि. पि.</u> इत्यस्य विभाजनात् परं, <u>जपान्-इन्नोवेशन्-पार्टी</u> इत्यनेन सह नूतनं संयुक्तसर्वकारस्य निर्माणं करिष्यति । चतुष्षष्टि-

वर्षीया ताकायिचि अद्य सायङ्काले सम्राज्ञा विहितस्य नियुक्त्यनन्तरं औपचारिकरूपेण कार्यभारं ग्रहीष्यति, तदनन्तरं तस्याः प्रथमं वार्तासम्मेलनं भविष्यति । ताकायिचि इत्येषा प्रमुखैः प्रतिद्वन्द्वीभिः सह एकस्य मन्त्रिमण्डलस्य निर्माणं विधाय एकतायाः सङ्केतं प्रायच्छत् । प्रधानमन्त्री नरेन्द्रमोदी साने ताकायिची इत्यस्यै प्रधानमन्त्रिरूपेण निर्वाचनाय वर्धापनं प्रायच्छत् । एकस्मिन् सामाजिक-संदेशे श्रीमोदी अवदत् यत् सः भारत-जपान-विशिष्ट-सामरिक-वैश्विक-सहभागित्वम् इतोऽपि सुदृढं कर्तुं तया सह कार्यं कर्तुं उत्सुकः अस्ति । सः अवदत् यत्, द्वयोः राष्ट्रयोः मध्ये प्रगाढाः सम्बन्धाः सम्पूर्णे इण्डो-पेसिफिक-क्षेत्रे, ततः परं च शान्तेः, स्थिरतायाः, समृद्धेः च कृते महत्त्वपूर्णाः सन्ति ।

---------------------------------------------

प्रधानमन्त्री-मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अक्टूबर-मासस्य षड्विंशति-दिनाङ्के आकाशवाणी इत्यत्र मन की बात इत्यस्मिन् कार्यक्रमे देशविदेशवासिभ्यः स्व-विचारान् प्रस्तौष्यति । इदं मासिक-रेडियो-कार्यक्रमस्य सप्तविंशत्यधिकैकशततमः भागः भविष्यति । जनाः 1800-11-7800 इति टोल-फ्री-दूरभाषसङ्केत-सङ्ख्यायाः माध्यमेन कार्यक्रमस्य कृते स्वविचारान् परामर्शान् च प्रेषयितुं शक्नुवन्ति। ते नरेन्द्रमोदी-एप् इत्यत्र अथवा माई जी-ओ-वी-ओपन्-फ़ोरम् इत्यनेन सञ्चालीय-माध्यमेन अपि स्वनिवेदनं दातुं शक्नुवन्ति । आगामिकार्यक्रमस्य कृते प्रस्तावाः अस्य मासस्य चतुर्विंशति-दिनाङ्कपर्यन्तं स्वीकृताः भविष्यन्ति ।

---------------------------------------------

मोदी-इस्रैल-प्रधानमन्त्री

अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना इस्रयेल्-देशस्य प्रधानमन्त्रिणः बेञ्जामिन् नेतन्याहु-वर्यस्य जन्मदिवसमुपलक्ष्य तस्मै जनिदिवसस्य शुभकामनाः प्रेषिताः सहैव तेन प्रधानमन्त्रिणः नेतन्याहु-वर्यस्य दीपावलीशुभाकामनाः प्रति धन्यवादज्ञापनम् अपि कृतम् ।

-----------------------------------------------

## प्रधानमन्त्री-अस्रानी

प्रधानमन्त्रिणा नरेन्द्रमोदिना लोकप्रिय-चलच्चित्राभिनेतुः गोवर्धन-असरानी इत्यस्य निधने शोकः प्रकटितः । एकस्मिन् सामाजिक-संदेशे, श्रीमोदी अवदत् यत्, एकः मनोरञ्जकः ,बहुमुख-प्रतिभासम्पन्नः कलाकारः, गोवर्धन-असरानीवर्यः चिरकालपर्यन्तं प्रेक्षकाणां मनोरञ्जनम् अकरोत् । प्रधानमन्त्री अवदत् यत्, सः विशेषतया स्वकीयेन अविस्मरणीय-प्रदर्शनेन अगणितजीवनेषु आनन्दं हास्यं च योजितवान् । भारतीय-चलच्चित्रेषु तस्य योगदानं सर्वदा स्मर्यते इति श्रीमोदी अवदत् । सः गोवर्धन-असरनी इत्यस्य परिवारं, प्रशंसकान् च प्रति सान्त्वनां प्रकटितवान् ।

-----------------------------------------------

## जी-एस्-टी

गतमासे द्वाविंशति-दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना घोषितः प्रारब्धः जीएसटी-बचत-महोत्सवः समाजस्य सर्वेषां वर्गाणाम् जनानां लाभाय वर्तते। आगामिन्याः परम्परायाः वस्तु-सेवा-करस्य अंतर्गतम् प्रशासनेन वाहनक्षेत्रस्य कृते महत् कर-शैथिल्यं घोषितम्। नूतनकरसंरचनायाः अन्तर्गतं अष्टादश-शत सीसीतिपरिमाणात् न्यून-इञ्जिन-क्षमतायुक्तेषु ट्रैक्टरवाहनेषु पञ्च प्रतिशतं करः भविष्यति, अष्टादशशत सीसीतिपरिमाणात् अधिक-इञ्जिनक्षमतायुक्तेषु ट्रैक्टरवाहनेषु अष्टादशप्रतिशतं करः भविष्यति अपि च, ट्रैक्टरवाहननिर्माणे प्रयुक्तानां घटकानां, यथा चक्र, गतिनियंत्रक - इत्यादीनां उपरि अपि पंचप्रतिशतं करः भविष्यति ।

।। इति वार्ताः ।।